चित्ताभोगः, पुं, (चित्तस्य आभोगः परिपूर्णता इत्यर्थः ।) एकस्मिन् विषये मनसः पुनः पुनः प्रवृत्तिः । तत्पर्य्यायः । मनस्कारः २ । इत्यमरः । १ । ५ । २ ॥

चित्तोन्नतिः, स्त्री, (चित्तस्य उन्नतिः उन्नयनम् ।) गर्व्वः । इति हेमचन्द्रः । २ । २३१ ॥

चित्यं, क्ली, (चीयते इति । चि + “चित्याग्निचित्ये च ।” ३ । १ । १३२ । इति कर्म्मणि यः । निपातनात्तुगागमे साधुः । यद्वा, क्यप्प्रत्ययेन पिति तुगागमः ।) चिता । इति त्रिकाण्डशेषः ॥ (तद्वाति त्रि । यथा, रामायणे । १ । ५८।११। “चित्यमाल्याङ्गरागश्च आयसाभरणोऽभवत् ॥”)

चित्यः, पुं, (चीयतेऽसौ इति । चि + “चित्याग्निचित्ये च ।” ३ । १ । १३२ । इति कर्म्मणि यः ।) अग्निः । इति मुग्धबोधम् ॥

चित्या, स्त्री, (चीयतेऽस्यां प्रेतस्य । चि + यः निपातनात् साधुः । क्यप् वा ।) चिता । इत्यमरः । २ । ६ । ११७ ॥

चित्र, त् क चणिकेहणे । लेख्योद्धृते । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-परं-सकं-सेट् ।) चणिकेहणं कदाचिद्दर्शनम् । चित्रयति चित्रापयति राहुं लोकः कदाचित् पश्यतीत्यर्थः । चित्रयति प्रतिमां लोकः । इति दुर्गादासः ॥

चित्रं, क्ली, (चित्रयतीति । चित्र + कर्म्मणि अप् । यद्वा, चीयते इति । “अमिचिमिशसिभ्यः क्त्रः ।” उणां ४ । १६४ । इति क्त्रः ।) तिलकम् । आलेख्यम् । (यथा, पञ्चदश्याम् । ६ । ५ । “उत्तमाधमभावेन वर्त्तन्ते पटचित्रवत् ॥”) अद्भुतम् । (यथा, रामायणे । १ । १० । “चित्रं संक्रीड़मानास्ताः क्रीड़नैर्विविधैस्तथा॥”) कर्व्वुरवर्णः । (यथा, माघे । १ । ८ “निसर्गचित्रोज्ज्वलसूक्ष्मपक्ष्मणा ॥”) तद्युक्ते त्रि । इति मेदिनी । रे, २५ ॥ (अलङ्कारविशेषः । यथा,— “तच्चित्रं यत्र वर्णानां खड्गाद्याकृतिहेतुता ।” सन्निवेशविशेषेण यत्र न्यस्ता वर्णाः खड्गमुरजपद्माकारमुल्लासयन्ति तच्चित्रं काव्यम् ॥ * ॥ अष्टिसंज्ञकषोड़शाक्षरावृत्तिच्छन्दोभेदः । तल्लक्षणं यथा, छन्दोमञ्जर्य्याम् ।
“चित्रसंज्ञमीरितं समानिकापदद्वयम् ।”
उदाहरणं यथा,—
“विद्रुमारुणाधरोष्ठशोभि वेणुवाद्यहृष्ट-
वल्लवीजनाङ्गसङ्गजातमुग्धकण्टकाङ्ग ! ।
त्वां सदैव वासुदेव ! पुण्यलभ्यपाद ! देव !
वन्यपुष्पचित्रकेश ! त्वां स्मरामि गोपवेश ! ॥”)
आकाशः । कुष्ठविशेषः । इति हेमचन्द्रः ।६।३४॥ (आश्चर्य्यान्विते, त्रि । यथा, महाभारते । १ । १ । ३ ।
“चित्राः श्रोतुं कथास्तत्र परिवव्रुस्तपस्विनः ॥”)

चित्रः, पुं, (चित्रयति पापपुण्ये विचार्य्य चित्रं करोति लिखतीत्यर्थः । चित्र + णिच् + अच् । यद्वा चीयन्ते उपचीयन्ते प्रेतलोका येन । चि + “अमिचिमिशसिभ्यः क्त्रः ।” उणां ।४।१६४ । इति क्त्रः ।) यमविशेषः । यथा, तिथ्यादितत्त्वे ।
“वृकोदराय चित्राय चित्रगुप्ताय वै नमः ॥”
कर्व्वुरवर्णः । इत्यमरटीकायां भरतः ॥ (सर्पविशेषः । यथा, महाभारते । २ । ६ । ८ ।
“क्राथश्च लोहितश्चैव पद्मश्चित्रश्च वीर्य्यवान् ॥”
धृतराष्ट्र-पुत्रभेदः । यथा, तत्रैव ।१।११७।४।
“चित्रोपचित्रौ चित्राक्षश्चारुचित्रः शरासनः ॥”) एरण्डवृक्षः । अशोकवृक्षः । चित्रकवृक्षः । इति राजनिर्घण्टः ॥

चित्रकं, क्ली, (चित्र + स्वार्थे कन् । यद्वा चित्रमिव कायति । कै + कः ।) तिलकम् । इति मेदिनी । के, ८८ ॥ (वृक्षविशेषः । यथा, गारुड़े १८७ अध्याये ।
“त्रिफला चित्रकं चित्रं तथा कटुकरोहिणी ॥”)

चित्रकः, पुं, (चित्रेण चित्र इव वा कायति । कै + कः ।) व्याघ्रः । इति हेमचन्द्रः । ४ । ३५१ ॥ व्याघ्रभेदः । चितावाघ इति भाषा । तत्पर्य्यायः । चित्रकायः २ उपव्याघ्रः ३ मृगान्तकः ४ शूरः ५ क्षुद्रशार्दूलः ६ चित्रव्याघ्रः ७॥ वृक्षविशेषः । चिता इति भाषा ॥ तत्पर्य्यायः । वह्निः २ शार्दूलः ३ चित्रः ४ पाचीकटुः ५ शिखी ६ कृशानुः ७ दहनः ८ व्यालः ९ ज्योतिष्कः १० पालकः ११ अनलः १२ दारुणः १३ वह्निः १४ पावकः १५ शम्बरः १६ पाची १७ द्वीपी १८ चित्राङ्गः १९ शूरः २० । अस्य गुणाः । अग्निसमत्वम् । पाके कटुत्वम् । शोफकफार्शोवातोदराग्निमान्द्यग्रहणीकृमिकण्डूनाशित्वञ्च । इति राजनिर्घण्टः ॥ पाकेऽग्नितुल्यत्वम् । कुष्ठनाशित्वम् । इति राजवल्लभः ॥ (यथा, शब्दार्थचिन्तामणिधृतवचनम् ।
“चित्रकः कटुकः पाके वह्निकृत् पाचनो लघुः ।
रूक्षोष्णो ग्रहणीकुष्ठशोथार्शःकृमिकासनुत् ॥
वातश्लेष्महरो ग्राही वातार्शःश्लेष्मपित्तहृत् ।
विचित्रं चैत्रकं शाकं कायमर्द्दविमर्द्दितम् ॥
तप्ततैले सवाङ्गीके पाचितं तक्रसम्भृतम् ॥”
ओषधिविशेषः । यथा, सुश्रुते सूत्रस्थाने ३६ अध्याये ।
“पूतिकश्चित्रकः पाठा विड़ङ्गैलाहरेणवः ॥”) एरण्डवृक्षः । इत्यमरः । २ । ४ । ५१ ॥ (चित्र + कुन् ।) चित्रकारः । इति हेमचन्द्रः ॥ (मुचुकुन्दः । यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
मुचुकुन्दः क्षत्रवृक्षश्चित्रकः प्रतिविष्णुकः ॥”
अस्य गुणः । शिरःपीड़ापित्तास्रविषनाशित्वञ्च॥)

चित्रकण्ठः, पुं, (चित्रः विचित्रः कण्ठोऽस्य ।) कपोतः । इति जटाधरः ॥ (कपोतशब्देऽस्य विवृतिर्ज्ञातव्या ॥)

चित्रकम्बलः, पुं, (चित्रश्चासौ कम्बलश्चेति ।) कम्बलविशेषः । दुलिचा गालिचा इत्यादि भाषा ॥ यथा, उणादिकोषे ।
“कुथः स्त्रीपुंसयोश्चित्रकम्बले पुंसि बर्हिषि ॥”

चित्रकरः, पुं, (चित्रं करोतीति । कृ + टः ।) वर्णसङ्करजातिविशेषः । पटुया इति भाषा ॥ स तु शूद्रागर्भे विश्वकर्म्मौरसजातः । इति ब्रह्मवैवर्त्तपुराणम् ॥ तत्पर्य्यायः । रङ्गाजीवः २ । इत्यमरः । २ । १० । ७॥ रङ्गजीवकः ३ । इति शब्दरत्नावली ॥ वर्णी ४ वर्णाटः ५ चित्रकारः ६ । इति जटाधरः ॥ (यथा, आर्य्यासप्तशत्याम् । ३४५ ।
“चित्रकरतूलिकेव त्वां सा प्रतिभित्ति भावयति॥”)

चित्रकर्म्मा, [न्] पुं, (चित्रं कर्म्मास्य ।) तिनिशवृक्षः । इति शब्दचन्द्रिका ॥ बहुव्रीहौ आश्चर्य्यकर्म्मा चित्रकारश्च ॥

चित्रकायः, पुं, (चित्रो नानावर्णयुक्तः कायो देहो यस्य ।) व्याघ्रः । इति हेमचन्द्रः ।४।३५१॥ चित्रव्याघ्रः । इति राजनिर्घण्टः ॥

चित्रकारः, पुं, (चित्रं करोतीति । कृ + “कर्म्मण्यण् ।” ३ । २ । १ । इत्यण् ।) चित्रकरः । (यथा, महाभारते । १ । १२८ । ४० ।
“समार्ज्जितं सौधकारैश्चित्रकारैश्च चित्रितम् ॥”) अस्य उत्पत्तिविवृतिर्यथा, पराशरपद्धतौ ।
“स्थपतेरपि गान्धिक्यां चित्रकारो व्यजायत ॥”

चित्रकूटः, पुं, (चित्राणि कूटानि शृङ्गाणि यस्य ।) पर्व्वतविशेषः । इति शब्दरत्नावली ॥ पुरा रामो वनं गत्वा प्रथमे यत्र वासमकरोत् । (पर्व्वतोऽयं प्रयागाच्चैत्रभरद्वाजाश्रमात् सार्द्धयोजनद्वयेऽतीते पार्श्वगतया मन्दाकिन्याख्यया सरिता दक्षिणतो राजते । यदुक्तं रामायणे । २ । ६२ । १० —१२ ।
“भरताहृतीयेषु योजनेष्वजने वने ।
चित्रकूटगिरिस्तत्र रम्यनिर्झरकाननः ॥
उत्तरं पार्श्वमासाद्य तस्य मन्दाकिनी नदी ।
पुष्पितद्रुमसंच्छन्ना रम्यपुष्पितकानना ॥
अनन्तरं तत्सरितश्चित्रकूटश्च पर्व्वतम् ।
तयोः पर्णकुटीं तात ! तत्र तौ वसतो ध्रुवम् ॥”)
अधुना बुन्देलखण्डाख्यदेशे कामता इति ख्यातः ॥ (अयं हि पीठस्थानेषु अन्यतमः । अत्र च भगवती सीतारूपेण महादेवश्चन्द्रचूड़रूपेण विराजते । यथा, देवीभागवते । ७ । ३० । ७० ।
“चित्रकूटे तथा सीता विन्ध्ये विन्ध्याधिवासिनी॥”
तथा, महालिङ्गेश्वरतन्त्रे ।
“चित्रकूटे चन्द्रचूड़ो योगेन्द्रो विन्ध्यपर्व्वते ॥”)

चित्रकृत्, पुं, (चित्रं नानावर्णं करोतीति । कृ + क्विप् ।) तिनिशवृक्षः । इत्यमरः । २ । ४।२७॥ (चित्रमालेख्यं करोतीति ।) चित्रकरः । इति हलायुधः ॥

चित्रकोलः, पुं, (चित्रो विचित्रः कोल क्रोड़देशो यस्य ।) अञ्जनिका । इति त्रिकाण्डशेषः ॥

चित्रगन्धं, क्ली, (चित्रो विचित्रो गन्धो यस्य ।) हरितालम् । इति राजनिर्घण्टः ॥

चित्रगुप्तः, पुं, (गुप रक्षणे + भावे क्तः । चित्राणां जीवकृतपापपुण्यादिविचित्राणां गुप्तं गोपनं